# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा –आचार्यप्रथमवर्षम् (SEM-1) | प्रश्नपत्रम् – ४ | |
| विषयः – स्वामिनारायणवेदान्तः ( J ) | (C.C.- 4.1.3. New ) | गुणाः – ७० |
| दिनाङ्कः – १२/१०/२०१९ | सन्दर्भग्रन्थः– श्रीमद्भगवद्गीता १–६ | समयः –८.०० तः ११.०० |

### प्रथमान्वितिः

**प्रश्नः १ निम्नलिखितयोरेक एव समाधेयः।** **(५)**

(१) ''धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।

मामकाः पाण्डवाश्चैव किमकुर्वत संजय ॥''

– इति श्लोकं गोपालानन्दमुनिविरचितभाष्यानुगुणं व्याख्यात।

(२) द्वितीयाध्यायमाधारीकृत्य आत्मनः नित्यत्वमुपपादयत।

**प्रश्नः २ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **(१०)**

(१) युद्धे समुपस्थितान् स्वसम्बन्धिजनान् दृष्ट्वा अर्जुनेन कृतं विषादमुपवर्णयत।

(२) भगवति अनिवेषितमनसः क्रमेण नाशः कथं भवति ? निरूपयत।

### द्वितीयान्वितिः

**प्रश्नः ३ निम्नलिखितयोरेक एव समाधेयः।** **(५)**

(१) ''न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।

न च सन्न्यसनादेव सिद्धिं समधिगच्छति ॥'' – इति श्लोकं सान्वयं व्याख्यात।

(२) ''यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।

स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥'' – इति श्लोकं व्याख्यात।

**प्रश्नः ४ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **(१०)**

(१) आत्मनः अकर्तृत्वानुसन्धानप्रकारं प्रतिपादयत।

(२) तृतीयाध्यायस्य सारभागं सङ्गृह्णीत।

### तृतीयान्वितिः

**प्रश्नः ५ निम्नलिखितयोरेक एव समाधेयः।** **(५)**

(१) गहना कर्मणो गतिः – इति यथाभाष्यं स्पष्टयत ।

(२) कर्मणः ज्ञानाकारता कथं उपपद्यते ? निरूपयत।

**प्रश्नः ६ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **(१०)**

(१) चतुर्थाऽध्यायोक्तप्रकारेण भगवदवतारयाथात्म्यम्,जन्महेतुम्,जन्मकालञ्च वर्णयत।

(२) भगवद्गीतानुसारेण कर्मणः दुर्ज्ञानतां प्रतिपादयन्तु।

**चतुर्थान्वितिः**

**प्रश्नः ७ निम्नलिखितयोरेक एव समाधेयः।** **(५)**

(१) ''सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्॥''-इति श्लोकं यथाभाष्यं व्याख्यात।

(२) ''चञ्चलं हि मनः कृष्ण प्रमाथि बलवद् दृढम्।
तस्याहं निग्रहं मन्ये वयोरिव सुदुष्करम्॥''- इति श्लोकं यथाभाष्यं व्याख्यात।

**प्रश्नः ८ कस्याऽपि एकस्य प्रश्नस्य समाधानं कुरुत।** **(१०)**

(१) ज्ञानयोगकर्मयोगयोः आत्मप्राप्तिसाधनाभावे अन्योन्यनैरपेक्ष्यम् उपवर्णयत।

(२) षष्ठाध्यायमाधारीकृत्य योगिनः स्वरूपं वर्णयत।

**प्रश्नः ९ अधोनिर्दिष्टेषु प्रश्नेषु केचन दशप्रश्नाः समाधेयाः।** **(१०)**

(१) ''निरवद्यः'' इति शब्दस्य कोऽर्थः ?

(२) पुरुषार्थचतुष्टयम् किम् ?

(३) ''हृषीकेशः'' इति शब्दस्य व्युत्पत्तिः का ?

(४) देहात् देहान्तरप्राप्तौ गीतोक्तम् उदाहरणं लिखत।

(५) कस्मात् अपेक्षया क्षत्रियस्य श्रेयः न विद्यते ?

(६) मरणापेक्षयाऽपि अतिरिक्तं हानिकारकं किम् ?

(७) के अघं भुञ्जते ?

(८) ''अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः'' इति अर्जुनस्य प्रश्नस्य भगवता श्रीकृष्णेन किमुत्तरं प्रदत्तम् ?

(९) ''तस्या धीराः परिजानन्ति योनिम्'' इत्यत्र ''धीरा'' इति पदास्य कोऽर्थः ?

(१०) कः विनश्यति ?

(११) सांख्ययोगशब्दयोः अर्थः कः ?

(१२) जन्तूनां मोहहेतुः कः ?

(१३) कः सन्यासी योगी च भवितुमर्हति ?

(१४) चेतनस्य बन्धुः शत्रुश्च कः ? कथम् ?

(१५) कस्य निग्रहः वायोरिव सुदुष्करः ?